Sahitya Manthan
A Peer-Reviewed, Open Access e-journal
ISSN: 2582 6867, Website: http://www.sahityamanthan.in
Year-2, Issue-5, Continuous Issue-11, January - February 2022

# हरिदाससिद्धान्तवागीशविरचित-वङ्गीयप्रतापनाटके नायकादिविचारः

१.०. प्रस्तावना

दशरूपककाराचार्यधनञ्जयेन स्वीये दशरूपकग्रन्थे नाटकस्य वस्तु-नेता-रसञ्चेति मूलतत्वत्रयमस्तीति अङ्गीकृतम्। अत्र नाटकस्य नेता नामक द्वितीयमूलतत्वस्य तथा च प्रस्तूयते।

१.१. नाटकेषु पात्रपरिकल्पनम्

नाट्यं हि नाम प्रकृत्या रसास्वादोन्मुखानां मनुष्याणां निर्मलानन्दजननं तद्द्वारा च हेयोपादेयताबुद्धिविवर्धनं प्रयोगयोग्यं काव्यम्। आदित एव नाट्ये प्रमुखतया उपदेशप्रदत्वं समावेशितम्। तथा च मुनिः पञ्चमवेदत्वेन परिकल्प्य ब्रह्मणा सृष्टस्य नाटकस्य प्रशस्यत्वानुवादमुखेन नाट्यस्वरूपं प्रतिपादयन्नाह–

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद् भविष्यति॥[1]

सर्वाण्येवात्र समुल्लिखितानि पदानि काव्यलक्षणेषु तत्तदालङ्कारिकैरपि परवर्तिभिः समावेशतानि। अतः काव्याद्व्यतिरेकं प्रदर्शयितुं प्रयोगयोग्यत्वस्य समावेशो नाट्यलक्षणेऽवश्यं करणीयः। एतदेवाभिप्रेतेय विश्वनाथेन दृश्यश्रव्यरूपेण काव्यद्वैविध्यं प्रतिपादितम्। तच्च दृश्यत्वमभिनेयत्वम्, आङ्गिकवाचिकसात्त्विकाहार्याभिनयैः प्रयोगयोग्यत्वमिति यावत्।

एतादृश्यं नाट्यं विषमभेदेनापि काव्याद् भिद्यते। काव्यस्य वर्णं प्राधान्येन अर्थरूपं धत्ते, नाट्यस्य पुनस्तत् चेष्टारूपम्। अतएव मुनिवचनम्-

नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्॥[2]

अत्र च नृपतिचरितं नाटके प्रयोगार्हमिति मुनिमतम्। कथं नृपतेरेव चरितं प्रदर्शनीयमित्यत्र चिरन्तनैराचार्यैस्तत्र रञ्जनावैशिष्ट्यमुपदेशप्रदानयोग्यत्वं च हेतुत्वेन निर्दिष्टम्। इत्थञ्चाप्यूहितुं शक्यतेकाव्यनाट्याभ्यां पाठकदर्शकचित्तावर्जकाभ्यां भाव्यम्। तच्चावर्जनं वैचित्र्यलोकोत्तरत्वविस्मयावहत्वादिभिः सुखसाध्यम्। सामान्यजनस्य चरितं तथा चित्ताकर्षकं न भवति यथा बहूनां जनानां भाग्यविधायकस्य नृपस्य। तथा च राजप्रधाने समाजे राजैव प्रामुख्यं भजते। भारतेऽस्मिन् आदिकालादेव राज्ञो दिव्यांशवत्त्वं देवतुल्यत्वञ्च स्वीकृयते। अस्मादेवात्र नृपतिचरितस्य नाट्यादावुपादेयत्त्वं पुनः पुनः प्रतिपादितम्। ग्रीसादिपाश्चात्यदेशेषु चानेनैव हेतुना राजानस्ते च जना नायकत्वेन सम्मता येऽसामान्या लोकोत्तरविभूतिभूषिताश्च।

1. ना.शा-१/११५
2. ना.शा-१/११२

एतदेवाभिप्रेतेय दिव्यादिव्य-दिव्यादिव्यभेदात् प्रकृतित्रैविध्यं प्रदर्श्यादयस्य नाट्यादौ नायकरूपेण प्रयोगो निषिद्धः। यतो हि उपदेशसाधकत्वेन कल्पते नाट्येऽत्यन्तालौकिकमहिमवद्भिर्दिव्यनायकैर्मनुष्याणां सुखोपदेशसिद्धिर्नैव भवति। उक्तं च श्रीमदभिनवगुप्तपादेन 'प्रख्यातत्वेऽपि देवचरितं वरप्रभावादिबहुलतया उपायोपदेशायायोग्यमिति' न निबन्धनीयम्। देवानां पूर्णकामत्वाद् दुःखशोकादययौगाच्च फलविशेषप्राप्तये तेषां प्रारम्भादिरपि नैव युज्यते। अतो नाट्ये अदिव्यानां वत्सराजदुष्यन्तादीनां दिव्यादिव्यानां रामकृष्णादीनामेव नायकत्वमुचितम्।

नाटकादौ अदिव्यदिव्यादिव्यकोटिकानां नायकानां समावेशं समर्थ्य सर्वेषामेव स्त्रीपुरुषाणामुत्तममध्यमाधमत्वेन त्रिधा प्रकृतिविभागो नाट्यशास्त्रे प्रदर्शितः । एषु चाधमप्रकृतीन् विहाय उत्तममध्यकोटिका एव नायकाः कल्पनीया इति भरतमतम्। तथा च

अत्र चत्वार एव स्युर्नायकः परिकीर्तिताः।
मध्यमोत्तमप्रकृतौ नानालक्षणलक्षिताः॥
धीरोद्धता धीरललिता धीरोदात्तास्तथैव च।
धीरप्रशान्तकाशचैव नायकाः परिकीर्तिताः॥

देवा धीरोद्धता ज्ञेयाः स्युर्धीरललिता नृपाः।
सेनापतिरमात्यश्च धीरोदात्तौ प्रकीर्तितौ॥
धीरप्रशान्ता विज्ञेया ब्राहमणा वणिजस्तथा॥[3]

अपि चान्यत्र–

व्यसनी प्राप्य दुःखं वा युज्यतेऽभ्युदयेन यः।
कथापुरुषमाहुस्तं प्रधानं नायकं बुधाः॥[4]

इत्येतेभ्यः श्लोकेभ्यो नायकस्वरूपं भरतसम्मतं ज्ञायते।

भारतीये नाट्यशास्त्रे नायकसम्बन्धिनी स्थितिरीदृशी। उत्तममध्यमान्यतरप्रकृतिः फलविशेषप्राप्तये प्रयत्नपरो धीरोदात्तादीष्वन्यतमः पुरुषो नाट्यादौ नायकः। दशरूपकाणां लक्षणश्लोकेषु तत्रतत्र धीरोदात्तादीनां नायकत्वेन प्रयोज्याप्रयोज्यत्वं च पुनर्मुनिना निर्दिष्टम्। तथा च नाटके उदात्तो नृपतिः, प्रकरणे च 'विप्रवणिक्सचिवानां पुरोहितामात्यसार्थवाहानाम्' अन्यतमो नायकः स्यात्। वीथ्यादिडिमान्तभेदेषु प्रधानपुरुषसंख्याया भूयिष्ठत्वान्नायकानुसन्धानं व्यर्थप्रायमिति मुनिमतं प्रतिभाति। उक्तं च तेन–

यत्रानेकस्यैव भवतो व्यसनाभ्युदयौ पुनः।
सुपुष्टौ यत्र तौ स्यातां न भवेत्तत्र नायकः॥[5]

नाटकेषु नायकस्यैव मुख्यत्वं भवति, अतश्च तत्सम्बद्धवृत्तमाधिकारिकमित्युच्यते। वृत्तान्तरस्य योजनायां सत्यां तन्नायकानां गौणत्वं मुख्यनायकवृत्तोपकारित्वं च कल्पितम्।

नाटकविशेषे नायकानुसन्धानं कथं कर्तव्यमिति प्रश्नो न दुःसमाधे । यस्य पुरुषस्य कार्याणि प्रत्यङ्कं दृश्यन्ते, यश्च नाटकान्ते फलसम्पत्तिभाग् भवति स एव नायक इति स्पष्टं

---

[3].ना.शा-२४/१६-१८
[4]. ना.शा-२४.२१-२२
[5]. ना.शा-२४/२२

ज्ञातुं शक्यते । प्रत्यङ्कं नायकानां 'प्रत्यक्षचरितसम्भोग'स्य विन्यासः कार्यः, अङ्कश्च 'सन्निहितनायको' भवेदिति च सूचयति मुनिः। यथा लोके तथैव नाट्यादौ प्रयोजनं किमप्युद्दिश्य मनुष्यः प्रवर्तते । तत्प्रयोजनस्य पूर्त्यर्थं मनुष्यः प्रयत्नपरायणो भवति, प्रयतमानश्चासौ विघ्नादीनपास्य फलसम्पत्त्या युक्तो भवति। एवं हि सर्वेष्वेव प्रयत्नसाध्यफलेषु पुरुषस्य पञ्च कर्मावस्था भवन्ति। ता एवावस्था आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाख्या नाट्यशास्त्रे प्रतिपादिताः।

**'यथा बीजाद् भवेत् वृक्षो वृक्षात्पुष्पं फलं तथा'** इति रसाध्याये भावरससम्बन्धनिरूपणश्लोके मुनिप्रयुक्तोपमा दृश्यते। सैवोपमात्रापि परमोपयोगिनी। बीजमेव समाश्रित्य भवत्यङ्कुरेदगमः। वर्णनीये वस्तुन्यपि तादृशं बीजं किञ्चित्स्याद् यदवलम्ब्य नायकस्य कर्मारम्भो भवेत्। बीजरूपेण यत्प्रयोजनमादावुप्यते नाट्यकारेण तस्यैव आफलावाप्ति प्रपञ्चनं नाट्यम्। तच्च फलं नायकगामि। शकुन्तलाया दुष्यन्तेन प्रथमदर्शनं बीजं तस्मादेवान्ततो दुष्यन्तस्य शकुन्तलामिलनफलप्राप्तिः। बीजं बीजानुस्यूतश्च क्रियाकलापो यत्परः स एव नायक इति मन्तव्यः। आदित अन्तं यावत्तस्यैव मुख्यत्वम्। अत एवाह नायकलक्षणे सागरनन्दी-'नायक इति बीजबिन्द्वादासम्बलितस्य नाटकस्य नाट्यमन्तं नयतीति नायकः। स एव धर्मकामार्थफलभाग् भवति' इति । मनुष्यप्रवृत्तेश्चतुर्वर्गमूलत्वे सत्यपि मोक्षरूपा फलप्रापेतिर्नाट्यादौ नायकस्य नैव प्रदर्शयितुं शक्या, अतस्त्रिवर्गफलप्राप्तिरेवात्र निबध्यते। शान्तरसमभ्युपगम्यापि तत्प्रधाने नाटके मोक्षप्राप्तिर्नैव फलत्वेन कल्पयितुं युज्यते। विषयवासनाविमुखं तत्त्वज्ञानोन्मुखं महापुरुषमाश्रित्य पार्थिवभोगानामसारत्वं तत्त्वज्ञानस्योपादेयत्वं च प्रतिपाद्य विनेयानां तदुन्मुखीकरणमेव तत्र फलत्वेन युक्तम्। मोक्षस्याभ्यर्हिततत्वं लक्ष्यभक्षतं तल्लक्ष्यप्राप्तिमार्गे निरोधकविघ्नैर्यः संघर्षः स एव नायकस्य तत्र प्रदर्शनीयः। तद्दर्शनेन च सामाजिकानां मोक्षविषयिणी बुद्धिर्द्रढीयसी स्यात् ।

१.२. वङ्गीयप्रतापनाटके नायकविचारः

श्रव्यकाव्येषु, दृश्यकाव्येषु, कथासु, पुराणेषु, इतिहासेषु वा नेतारमनुसृत्यैव कृतप्रतिष्ठा वर्धिष्यते। अत एवं विद्यानाथादि पण्डितप्रवराः 'पुण्यश्लोकस्य चरितमुदाहरणमर्हति' इत्यावदन्। प्रबन्धानां प्रबन्धृणामपि मूलविषयभूतस्य कीर्तिप्रतिष्ठयोः नेतुर्गुणनिरूपणमिति बहुधा दृश्यन्ते।

यत्र इतिवृत्ते सत्यवचनं, अविसम्बादकरणनीतिशास्त्रनैपुण्यादि प्रसिद्धाभिगामिकादि गुणैः, कुलं, शीलं, दया, दानं, धर्मः, सत्यं, कृतज्ञा एतैर्युक्तः महासत्त्वादिगुणनिष्ठ, प्रतापवान्, कीर्तिकामः, उत्कृष्टपुरुषार्थ-साधन-कर्मारभ्याध्यवसायः, वेदस्य वेदोक्त-कर्मश्च पालकः राजा अथवा दिव्यो वा मर्त्यो वा नायकः भवेदिति नाट्यशास्त्रविचक्षणाः अवदन्।

१.४. सम्राट् प्रतापादित्यः **-** महामहोपाध्यायः हरिदाससिद्धान्तवागीशप्रणीतं अष्टाङ्कयुक्तं वङ्गीयप्रतापनाटकं अत्यन्तं गुरुत्वपूर्णम् ऐतिहासिकनाटकम्। नाटकस्यास्य प्रधानपात्रो तथा नायको बङ्गप्रदेशस्य प्रख्यातवंशजः प्रतापादित्यः इति अत्र नास्ति सन्देहस्यावकाशः। नाटकस्य नायकत्वेन ये गुणानामावश्यकं वर्तन्ते ते सर्वे गुणाः अस्य नाटकस्य नायको प्रतापादित्येषु अन्तर्भवन्ति। प्रदापादित्य-चरित्रस्य अदमनीयवीरत्वं तथा देशप्रेमः एव अस्य नाटकस्य मूलमस्ति।

हरिदाससिद्धान्तवागीशविरचितेषु नाटकत्रयेषु एव पञ्चसन्धिः, विष्कम्भकः, प्रवेशकः, चूलिकादि अर्थपक्षेपकः, पञ्चावस्था, पञ्चार्थप्रकृतयः इत्यादयः पुङ्खानुपुङ्खरूपेण दशरूपकं तथा

साहित्यदर्पणानुसारं प्रयुक्तमस्ति। नाटकस्य नायको कीदृशो भवेत् अस्मिन् विषये दशरूपककारधनञ्जेन दशरूपकग्रन्थस्य तृतीयप्रकाशस्य प्रारम्भैव उक्तम्-

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥[6]
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥[7]

अर्थात् नाटकस्य नायको विनय-मर्यादाबोध-आत्मसम्मान-उत्साह-प्रज्ञादि गुणेषु विभूषितं भवेत्, प्रख्यातवंशोद्भूतं भवेत्; वीर-धीर-दृढव्रत-धार्मिक-शास्त्रज्ञादि गुणाधारः भवेत्। अस्माभिः हरिदाससिद्धान्तवागीशविरचितवङ्गीयप्रतापनाटकस्य नायको प्रतापादित्येषु उपरिउक्तगुणानां असाधारणं समन्वयं परिलक्ष्यते। अस्य ऐतिहासिकनाटकस्य नायकस्य आत्ममर्यादाज्ञानं इदं नाटकम् आधुनिकसंस्कृतनाट्यजगति एकं विशिष्टं मर्यादा दत्तम् ।

अस्य नाटकस्य नायको प्रतापादित्यो धीरोदात्तनायकेषु अन्तर्भवति। तस्य गम्भीराकृतिः, मधुरवाणी च स्तः। प्रतापादित्यो बलिष्ठः, पराक्रमशाली, ललितकलानां मर्मज्ञः, प्रकृतिप्रेमि, कुशलचित्रकारश्चासीत्। प्रतापादित्येषु मानवोचितं दुर्बलताऽपि आसीत्, किन्तु स पुत्रवत्सलः, प्रजावत्सलः, कर्तव्यपरायणश्च राजा आसीत्।

धीरोदात्तो नायकस्य लक्षणं दशरूपककारधनञ्जयेन एवमुक्तम्-

महासत्त्वोऽतिगम्भिरः क्षमावानविकत्थनः।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः॥[8]

अर्थात् महासत्त्वः= शोकक्रोधाद्यनभिभूतान्तःसत्त्वः, तेजस्वी च, क्षमावान् = सहनशीलः, अविकत्थनः = अनात्मश्लाघनः, निगूढाहङ्कारः = विनयच्छन्नावलेपः, दृढव्रतः = अङ्गीकृतनिर्वाहकः, धीरोदात्तः। धीरोदात्तनायको अन्तकरणशोकक्रोधाभ्याम् अभिभूतः नैव भवति। वङ्गीयप्रतापस्य प्रतापादित्योऽपि महासत्त्वः, अतिगम्भिरः,
क्षमावान्, विकत्थनः, स्थिरो, निगूढाहङ्कारोऽस्ति। स स्वीय राजकीय कर्तव्यपालने कुशलोऽस्ति–

एष देशवितताममपनेतुं दुर्दशां यवनजां ध्रुवमिच्छुः।
आशयो हृदिशयो हि जनानां चेष्टया मुखदृशोरनुमेयः॥[9]

अस्मिन् श्लोके प्रतापादित्यो दुर्दशां यवनानां अत्याचारविषये वर्णनां करोति । तदर्थं स कथयति-'तदनेन महत् कार्य्यं साधनीयम्। किमयमात्मपीडा प्रतिविधानपणनेनाप्यर्य्यमानः साहचर्य्यं मे नाङ्गीकुर्य्यात्। अथवा कः खल्वातुरो दीयमानमौषधमुपेक्षेत। भवतु। पृच्छामि यावत्। भवतस्तावदावेगकारणं श्रोतुमिच्छामि।'(व.प्र.पृ-)

प्रतापादित्यो आदर्श राजा आसीत् । स सर्वदा प्रजानां हितार्थमेव कार्यं कुर्वन्नासीत्। दुष्टानां दमनं कृत्वा प्रजानां कृते शान्ति स्थापयति स्म । अतः स प्रजानां हितैषी-बन्धुरासीत्। प्रजानां तथा

---

6. द. रू.-२/१
7. द.रू.-२/२
8.द.रू- २/४

9.व.प्र-१/१८

स्वीय हितार्थं राज्ञः किङ्कर्तव्यमिति अस्मिन् प्रसङ्गे आचार्यकौटिल्यस्य मतं स्वीकृतम् । तद्यथा–

प्रजासुखे सुखं राज्ञः प्रजाणां च हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्॥[10]

अर्थात् राज्ञः आत्मप्रियं हितं नैव भवति अपितु प्रजानां तु प्रियं तदेव राज्ञः हितम् इत्यार्थः । अत्र वङ्गीयप्रतापनाटकस्य नायको प्रदापादित्योऽपि आत्मप्रियं नासीत्, प्रजानां हिते एव सुखी भवति स्म । तदर्थं प्रथमोऽङ्के स शङ्करचक्रवर्ती मुखात् भारत् सम्राट् आकबरस्य हिंस्रकर्मचारिभिः प्रजानां प्रति अमानविकम् अत्याचारं प्रचलति इति श्रुत्वा वङ्गीयप्रतापादित्येन दुःखेनोक्तम्–

जनः कारारुद्धः प्रसभमपराधाल्लधुतरात् निराहारः क्रूरप्रहरिकृपीडामनुभवन्।
पशुप्रायो नश्येदपि, न तु यतेतोन्नमयितु शिरांस्येकीभूयक्षणमपि वहन् विक्रमरसम्॥[11]

अथवा। सम्प्रति हि–

विधर्म्म्याधीना वत् भारतप्रजा नदीप्रवाहे पतिता लता तथा।
नैवोन्नतिं गच्छति निष्फलोद्यमा परानुगत्यं हि लघीयसां क्रिया॥[12]

उपरिउक्त श्लोकद्वारा एव ज्ञायते राजा प्रतापादित्यो कीदृशः प्रजावत्सलः आसीत् । अत्र प्रजानां दुःखे राजा प्रतापादित्योऽपि दुःखमनुभवति इति स्पष्टं परिदृश्यते ।

अतएव प्रतापादित्यो महान् प्रतापशाली, प्रजारक्षकश्च राजा आसीत् । सः साधूनां परित्राणाय दुष्कृतां विनाशाय च सर्वदा कार्यरतः आसन् । श्रीमद्भगवद्गीतायां चतुर्थोऽध्याये भगवानुवाच–

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥[13]

अत्र वङ्गीयप्रतापस्य नायकोऽपि तथैव कृतम् । यवनसम्राट् आकबरो समग्रे भारते तस्य साम्राज्यविस्ताराय तथा इस्लां धर्मविस्ताराय व्यस्तः आसन् । परन्तु वङ्गीयप्रतापो प्रतापादित्यो आकबरस्य वश्यतां अस्वीकृत्वा स्वीय धर्मरक्षार्थं तथा प्रजानां परित्राणाय आकबरसेनापति मानसिंहेन सह युद्धमकरोत्। नाटकस्यास्य अष्टमोऽङ्के युद्धस्य प्रारम्भे प्रतापादित्यो कथयति- 'भो भोः सत्यसङ्कल्पाः साधूद्यमा वङ्गीयप्रवीराः! अयमेव नः शेषावसरः स्वदेशदुर्द्दशायाः, इदमेव शुभं मुहूर्त्तं जातीयजीवनारम्भस्य, एष एव सम्प्राप्तः समीचीनः परीक्षाकालः, अयमेव प्रशस्ततमः समयो दैत्यहत्यायाः, एष एव च साधीयानवसरो विजयवैजयन्तीलाभस्य।'[14] तत्त्वरमाणा अतित्वरमाणाः खलु भवन्तः–

क्षिपन्तु गुलिकावलीमविरतं शतघ्नीशतात्
विशन्तु परमण्डलं तुरगिणो नान्मण्डलात्।

---

[10]. अ.शा-१/१९/५

[11]. व.प्र-१/२४

[12]. व.प्र-१–२५

[13]. भ.गी-४/८

[14]. व.प्र.पृ- १४२

धुनन्तु ननु धन्विनो ध्वनितकोटिवन्वान्यतः
पतन्तु च पदातयः परशिरःपातिनः शत्रुषु॥[15]

वङ्गीयप्रतापनाटके प्रतापादित्यो दृढप्रतिज्ञः, कूटनीतिविशारदः, तथा महान् राजनीतिज्ञश्च रूपेण वर्णितमस्ति। तस्य स्वीय पुरुषार्थं प्रति पूर्णं विश्वासोऽस्ति। स 'दैवेन देयमिति कापुरुषा वदन्ति' इति अक्षरशः स्वीकरोति। अतः सः भाग्य विश्वासं न करोति स्म। वस्तुतः प्रतापादित्यो स्वीय कर्तव्यमेव कार्यसिद्धेः लक्ष्यरूपेण स्वीकरोति। नाटकस्यास्य चतुर्थेऽङ्के कुलस्त्रीणां दुरावस्था दृष्ट्वा प्रतापं प्रति अवदत्- 'आः प्रज्वलति हृदये दावाग्निः।' अतएव वङ्गीय सम्राट् प्रतापादित्यो स्वीय कर्तव्य पालनार्थं धीरेन्द्रं प्रति उवाच- 'धीरेन्द्र ! ब्रूहि सेनापतिं सूर्य्यकान्तम्। आदाय राजपुतवङ्गचभूमिहैव गत्वा विलुण्ठा पुनरेतु च राजधानीम्।' पुनः उक्तं 'संग्रामास्पदञ्चेदं संग्रामपुरं नाम प्रथितमस्तु।'[16]

सहायकग्रन्थसूची


१. अभिज्ञानशाकुन्तलम्– कालिदासः, भारतीय विद्या प्रकाशन वाराणसी.
२. अमरकोषः– अमरसिंहः, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, २००७
३. आधुनिकसंस्कृतसाहित्यम्– ऋता चट्टोपाध्याय, प्रग्रेशिभ पब्लिशर्स कोलकाता-७३, २०१२
४. पाणिनीयम्– हृषिकेशशास्त्री, दि ढाका स्टुडेन्टस् लाइब्रेरी, कोलकाता-७३
५. प्राचीन भारत का इतिहास– श्रीकृष्णचन्द्र श्रीवास्तव, यूनाइटेड् बुक डिपो, इलाहाबाद, २००१-२००२
६. रूपचन्द्रिका– चौखम्बा सुरभारती प्रकाशन, वाराणसी-२२१००१
७. वङ्गीयप्रतापम्– हरिदाससिद्धान्तवागीशः, संस्कृतसाहित्यपरिषद् , कोलकाता-७३
८. श्रीमद्भगवद्गीता– गीताप्रेस, गोरखपुर-२७३००५
९. संस्कृतदिशा– तपनकुमार अञ्जय, रमानाथ मजुमदार स्ट्रीट, कोलकाता-७००००९, २०१३



डॉ. सुमन्तप्रामानिकः
साहित्यविभागः
राष्ट्रीयसंस्कृतविद्यापीठम्
तिरुपतिः, आन्द्रप्रदेशः
e-mail – sumanta.pramanik1@gmail.com


15. व.प्र- ८/१०
16. व.प्र.पृ- ९१